रजतजयन्ती ग्रन्थमाला-४

# मानुषत्वाद् दैविकत्वं प्रति



के० पी० ए० मेनोन्

राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला- ४

# मानुषत्वाद् दैविकत्वं प्रति

के. पी. ए. मेनोन्

राष्ट्रीय-संस्कृत-संस्थानम्
नई दिल्ली

# प्राक्कथनम्

प्रायः दशसंवत्सरात्पूर्वं अमेरिका देशतो मम दर्शनार्थं यदा मत्पुत्र आगतवानासीत्तदाहं सदुपदेशप्रतिपादकस्य कस्यचन पाश्चात्यसाहित्य ग्रन्थस्याध्यनंकृतवानासम् । ग्रन्थोऽयं आङ्गलभाषामहाकविना अलक्साण्टर पोप् महोदयेन ग्रथितानां निबन्धानां प्रशंसात्मकं निरूपणमासीत् । अपि चास्य निरूपक आसीत् षेक्स्पियरु महोदयस्य निरूपकेषु प्रसिद्धः विल्सण् नइट्महोदयः । तन्मतानुसारेण पोप् महोदयस्य निबन्धेषु सदुपदेशात्मकत्वं सम्यक्तया दृश्यते ।विना सदुपदेशात्मकत्वं यःकोऽपि साहित्य निबन्धः काव्यो वा समीचीनतां पूर्णाताञ्च प्राप्तुं न प्रभवतीत्येव विल्सण् महोदयस्याशयः। पोप् महोदयस्य कृतिषु सदुपदेशात्मकत्व प्रतिपादनं प्रधानतया दृश्यत इत्यस्मात्कारणाद्विमर्शकैरस्य सत्कवित्वं अस्य ग्रन्थानां श्लाधनीयत्वञ्चाङ्गीकृतमस्ति ।

ईदृशानामुपदेशात्मकसन्देशानां दृश्यमानत्वादेव षेक्स्पियरु, गोथे, दान्ते, विर्जिल् प्रभृतीनां पाश्चात्यसाहित्यकाराणां तथा ग्रीक्नाटककर्तृणाञ्च ग्रन्थाः सहृदयैः परमं श्लाधनीया दृश्यन्ते ।

विषयमिदं मत्कृते अतीवाह्लादकारी तथाश्चर्यकारीचासीद्यत्पाश्चात्य साहित्यनिरूपका अपि विना कामपि विचिकित्सां साहित्यकृतिष्वन्तर्भूतस्य उपदेशात्मकत्वस्य स्वीकारःकृतवन्त इति ।इममेव सिद्धान्तं मानदण्डत्वेन स्वीकृत्य मया भारतीयसाहित्यप्रपञ्चे अस्याः सदुपदेशात्मकतायाः पर्यवेक्षणं विधत्तम् । गतेषु त्रिषु दशाब्देषु कालिदासं तद्ग्रन्थाञ्चाध्ययनं कृत्वा मयैतदवगतं यत्रास्ति तत्रैकोऽपिग्रन्थः कालिदासस्य यत्र सदुपदेशात्मकत्वं न विद्यते । धर्मार्थ-काम-मोक्ष इति चतुर्विधपुरुषार्थप्राप्तेर्मार्गदर्शकान्यनेकान्युपदेशानि रामायणादिषु-भारतीयेतिहासेषु दृश्यन्त इत्यत्र नास्ति संशयः ।

विषयमिममवलम्ब्य मन्मनसि विचारः प्रचलति सति दिल्लीसंस्कृत अकाडमी द्वारा वाल्मीकिजयन्ती समारोहे निमन्त्रितोऽहं विषयमिममेवावलम्ब्य निबन्धमेकं पठितुं प्रेरितवान् । तदा मया तस्मिन् समारोहे "आदिकवेरादर्शपुरुषः समाजश्च" इति विषयमवलम्ब्य निबन्धःपठितः ।

अयमासीन्महान्सन्तोषस्य विषयो मत्कृते यन्मम निबन्धःश्रोतृणां मनसि विषयमिमं प्रति श्रद्धामङ्कुरितुं समर्थ आसीदिति ।अपि च विषयमिममवलम्ब्य

# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. | .प्राक्कथनम् | i |
| २. | .प्रस्तावना | iii |
| ३. | वाल्मीकिरामायणे चित्रीकृतः समाजः | 1 |
| ४. | आदर्शनृपतिरथवा अवतारपुरुषः | 5 |
| ५. | अहं दाशरथिर्भूत्वा | 10 |
| ६. | सद सीतासौमित्रे श्रीरामकथा | 23 |
| ७. | अधिरोहण पदव्याम् | 37 |
| ८. | उच्चतरत्वेऽपि मानुष एव | 49 |
| ९. | देवानमपि दुष्करम् | 73 |
| १०. | रामस्य युद्धनयः तत्ररावणरय प्रतिकरणं च | 83 |
| ११. | त्रिस्तरीया समाजव्यवस्थितिः | 98 |
| १२. | रामो विग्रदवान् धर्मः | 107 |

## ॥ सह सीतासौमित्रे श्रीरामकथा ॥

नारदेनोपवर्णितस्यादर्शपुरुषस्य गुणातिशयाननुचिन्तयन् वाल्मीकिर्निषादं क्रौञ्चपतत्रिणं विध्यन्तं ददर्श ॥ तत्क्षणादेव मनोभूतः शोकः श्लोकत्वेन बहिर्निर्गतः शीघ्रमेव तत्पुरतः प्रकटीभवन् ब्रह्म तद्रचितः श्लोकरूप एवेति तं बोधयामास । स च महर्षिमन्वरुध्यत-यच्चानुरोधो .वस्तुत. आदेशरूप आसीत्-नारदाच्छ्रुतं वृत्तमनुकृत्य काव्यरूपं प्रबन्धं विरचितुम् । वस्तुतो रामस्यासीत् कथा किन्तु ब्रह्मा तां कथां रामस्य सह सौमित्रे वैदेह्याश्च राक्षसानां च कथात्वेन स्पष्टीकृतवान्

**रामस्य सहसौमित्रे**
**राक्षसानां च सर्वशः ।**
**वैदेह्याश्चैव यद्वृत्तं**
**प्रकाशं यदि वा रहः- इत्यादि (बा - II-94)**

किमर्थं लक्ष्मणस्य सीतायाश्च शब्दतो निर्देशः कृतः? रामस्य कथाया आख्यानसमकालमेव लक्ष्मणस्य जनकात्मजायाश्च चरितं प्रमुखतयाऽख्यातमेव स्यात् । तथापि भगवान् विरिञ्चिः शब्दतस्तौ द्वौ निर्दिशति ॥ को वाऽत्र हेतुः ? । रामायणकथायाः प्रारम्भे सा पौलस्त्यवधनाम्ना निर्दिष्टा तस्याः कथायाः सीताया महश्चरितत्वेनापि निर्देशो वर्तते ॥ नृपकुमारौ कुशलवौ रामायणे वैदेह्याश्चरितं गायतः ॥

वस्तुस्थितिरियं यद् भ्रातरं लक्ष्मणं विना रामस्य पृथगस्तित्वमेव न वर्तते । अपि च तस्य व्यक्तित्वस्योन्नततमः स्तरः सीतया सह संपृक्तत्वेनैवावतिष्ठते । स्वाभाविकतया ब्रह्ममणोऽयं निर्देशो-रामस्य कथा लक्ष्मणेन वैदेह्याश्च संमिश्रिता एव प्रकटीभवतु इति ॥ रामस्यावतारो राक्षसानां वधायैव ॥ अत एव एवं वादमुखो यदियं कथा राक्षसानां चापीति ॥ रामस्य गुणातिशयान् परभागशोभात्वेनैव प्रदर्शयितुं राक्षसराजं प्रतिनिधित्वेन स्वीकरोति कविः । न केवलं तस्य विक्रमातिशयेन अपि च स्वतेजसो वैभवेन चात्युन्नतां पदवीं समवाप्नोति राक्षसराजः ॥ वस्तुत आधुनिकभारतीयभाषासु निर्मितानां रामायणकाव्यानां कानिचिद्रावणं बृहदाकारत्वेनोपवर्णयन्ति यतस्तादृशं महासत्त्वं पराजितवान् रामस्तस्मादपि वैभवातिशयोत्कर्षं . प्राप्नोति । किन्तु वाल्मीकिना स्ववर्णनेऽतिशयोक्तिर्नादृता ॥ सर्वेन्द्रियान् संयम्य तपांसि विधाय रावणः



# राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)